# shrI lalitAhRidaya stotraM

# શ્રીલલિતાહૃદયસ્તોત્રમ્

## Document Information

Text title : laLitaahRidaya stotraM

File name : shrIlalitAhRidayastotram.itx

Category : hRidaya, devii, dashamahAvidyA, lalitA, devI

Location : doc_devii

Author : Traditional

Transliterated by : Adwaith Menon adwaithmenon at gmail.com

Proofread by : Adwaith Menon

Latest update : June 15, 2005

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીલલિતાહૃદયસ્તોત્રમ્

અથશ્રીલલિતાહૃદયસ્તોત્રમ્ ॥

શ્રીલલિતામ્બિકાયૈ નમઃ ।
દેવ્યુવાચ ।
દેવદેવ મહાદેવ સચ્ચિદાનન્દવિગ્રહા ।
સુન્દર્યાહૃદયં સ્તોત્રં પરં કૌતૂહલં વિભો ॥ ૧॥

ઈશ્વરૌવાચ ।

સાધુ સાધુત્વયા પ્રાજ્ઞે લોકાનુગ્રહકારકમ્ ।
રહસ્યમપિવક્ષ્યામિ સાવધાનમનાઃશ‍ૃણુ ॥ ૨॥

શ્રીવિદ્યાં જગતાં ધાત્રીં સર્ગ્ગસ્થિતિલયેશ્વરીમ્ ।
નમામિલલિતાં નિત્યાં ભક્તાનામિષ્ટદાયિનીમ્ ॥ ૩॥

બિન્દુત્રિકોણસમ્યુક્તં વસુકોણસમન્વિતમ્ ।
દશકોણદ્વયોપેતં ચતુર્દ્દશ સમન્વિતમ્ ॥ ૪॥

દલાષ્ટકેસરોપેતં દલષોડશકાન્વિતમ્ ।
વૃત્તત્રયયાન્વિતમ્ભૂમિસદનત્રયભૂષિતમ્ ॥ ૫॥

નમામિ લલિતાચક્રં ભક્તાનામિષ્ટદાયકમ્ ।
અમૃતામ્ભોનિધિન્તત્ર રત્નદ્વીપં નમામ્યહમ્ ॥ ૬॥

નાનાવૃક્ષમહોદ્યાનં વન્દેહં કલ્પવાટિકામ્ ।
સન્તાનવાટિકાંવન્દે હરિચન્દનવાટિકામ્ ॥ ૭॥

મન્દારવાટિકાં પારિજાતવાટીં મુદા ભજે ।
નમામિતવ દેવેશિ કદમ્બવનવાટિકામ્ ॥ ૮॥

પુષ્યરાગમહારત્નપ્રાકારં પ્રણમામ્યહમ્ ।
પદ્મરાગાદિમણિભિઃપ્રાકારં સર્વદા ભજે ॥ ૯॥

ગોમેદરત્નપ્રાકારં વજ્રપ્રાકારમાશ્રયે ।
વૈડૂર્યરત્નપ્રાકારમ્પ્રણમામિ કુલેશ્વરી ॥ ૧૦॥

ઇન્દ્રનીલાખ્યરત્નાનાં પ્રાકારં પ્રણમામ્યહમ્ ।
મુક્તાફલમહારત્નપ્રાકારમ્પ્રણમામ્યહમ્ ॥ ૧૧॥

મરતાખ્યમહારત્નપ્રાકારાય નમોનમઃ ।
વિદ્રુમાખ્યમહારત્નપ્રાકારમ્પ્રણમામ્યહમ્ ॥ ૧૨॥

માણિક્યમણ્ડપં રત્નસહસ્રસ્તમ્ભમણ્ડપમ્ ।
લલિતે!તવદેવેશિ ભજામ્યમૃતવાપિકામ્ ॥ ૧૩॥

આનન્દવાપિકાં વન્દેવિમર્શવાપિકાં ભજે ।
ભજેબાલાતપોલ્ગારં ચન્દ્રિકોગારિકાં ભજે ॥ ૧૪॥

મહાશૃઙ્ગારપરિખાં મહાપત્માટવીં ભજે ।
ચિન્તામણિમહારત્નગૃહરાજં નમામ્યહમ્ ॥ ૧૫॥

પૂર્વાંનાયમયં પૂર્વ્વદ્વારં દેવિ નમામ્યહમ્ ।
દક્ષિણાંનાયરૂપન્તેદક્ષિણદ્વારમાશ્રયે ॥ ૧૬॥

નમામિ પશ્ચિમદ્વારં પશ્ચિમામ્નાય રૂપકમ્ ।
વન્દેહમુત્તરદ્વારમુત્તરામ્નાયરૂપકમ્ ॥ ૧૭॥

ઊર્દ્ધ્વામ્નાયમયં વન્દે હ્યૂર્દ્ધ્વદ્વારં કુલેશ્વરિ ।
લલિતેતવ દેવેશિ મહાસિંહાસનં ભજે ॥ ૧૮॥

બ્રહ્માત્મકં મઞ્ચપાદમેકં તવ નમામ્યહમ્ ।
એકંવિષ્ણુમયં મઞ્ચપાદમન્યં નમામ્યહમ્ ॥ ૧૯॥

એકં રુદ્રમયં મઞ્ચપાદમન્યં નમામ્યહમ્ ।
મઞ્ચપાદંમમામ્યેકં તવ દેવીશ્વરાત્મકમ્ ॥ ૨૦॥

મઞ્ચૈકફલકં વન્દે સદાશિવમયં શુભમ્ ।
નમામિતેહંસતૂલતલ્પકં પરમેશ્વરી! ॥ ૨૧॥

નમામિતે હંસતૂલમહોપાધાનમુત્તમમ્ ।
કૌસ્તુભાસ્તરણંવન્દે તવ નિત્યં કુલેશ્વરી ॥ ૨૨॥

મહાવિતાનિકાં વન્દે મહાયવિનિકાં ભજે ।
એવં પૂજાગૃહં ધ્યાત્વા શ્રીચક્રે શ્રીશિવાં ભજે ॥ ૨૩॥

સ્વદક્ષિણે સ્થાપયામિ ભાગે પુષ્પાક્ષતાદિકાન્ ।
અમિતાંસ્તેમહાદેવિ દીપાન્ સન્દર્શયામ્યહમ્ ॥ ૨૪॥

મૂલેન ત્રિપુરાચક્રં તવ સમ્પૂજયયામ્યહમ્ ।
ત્રિભિઃખણ્ડૈસ્તવખ્યાતૈઃ પૂજયામિ મહેશ્વરિ! ॥ ૨૫॥

વાય્વગ્નિ જલસમ્યુક્તં પ્રાણાયામૈરહં શિવૈ ।
શોષાણાન્દાહનં ચૈવ કરોમિ પ્લાવનં તથા ॥ ૨૬॥

ત્રિવારં મૂલમન્ત્રેણ પ્રાણાયામં કરોમ્યહમ્ ।
પાષણ્ડકારિણોભૂતા ભૂમૌયે ચાન્તરિક્ષકે ॥ ૨૭॥

કરોમ્યનેન મન્ત્રેણ તાલત્રયમહં શિવે ।
નારાયણોઽહમ્બ્રહ્માહં ભૈરવોઽહં શિવોસ્મ્યહમ્ ॥ ૨૮॥

દેવોહં પરમાનન્દોઽસ્મ્યહં ત્રિપુરસુન્દરિ ।
ધ્યાત્વાવૈ વજ્રકવચં ન્યાસં તવ કરોમ્યહમ્ ॥ ૨૯॥

કુમારીબીજસમ્યુક્તં મહાત્રિપુરસુન્દરિ! ।
માંરક્ષરક્ષેતિ હૃદિ કરોમ્યઞ્જલિમીશ્વરિ! ॥ ૩૦॥

મહાદેવ્યાસનાયેતિ પ્રકરોમ્યાસનં શિવે ।
ચક્રાસનંનમસ્યામિ સર્વમન્ત્રાસનં શિવે ॥ ૩૧॥

સાદ્ધ્યસિદ્ધાસનં મન્ત્રૈરેભિર્યુક્તં મહેશ્વરિ ।
કરોમ્યસ્મિઞ્ચક્રમન્ત્રૈર્દેવતાસનમુત્તમમ્ ॥ ૩૨॥

કરોમ્યથ ષડઙ્ગાખ્યં માતૃકાં ચ કલાં ન્યસે ।
શ્રીકણ્ટકેશવં ચૈવ પ્રપઞ્ચં યોગમાતૃકામ્ ॥ ૩૩॥

તત્ત્વન્યાસં તતઃ કૂર્વે ચતુષ્પીટં યથાચરે ।
લઘુષોઢાન્તતઃ કૂર્વે શક્તિન્યાસં મહોત્તમમ્ ॥ ૩૪॥

પીટન્યાસં તતઃ કુર્વે દેવતાવાહનં પ્રિયે ।
કુઙ્કુમન્યાસકઞ્ચૈવ ચક્રન્યાસમથાચરે ॥ ૩૫॥

ચક્રન્યાસં તતઃ કુર્વે ન્યાસં કામકલાદ્વયમ્ ।
ષોડશાણર્ણમહામન્ત્રૈરઙ્ગન્યાસઙ્કુરોમ્યહમ્ ॥ ૩૬॥

મહાષોઢાં તતઃ કુર્વે શામ્ભવં ચ મહાપ્રિયે ।

તતોમૂલમ્પ્રજપ્ત્વાથ પાદુકાઞ્ચ તતઃ પરમ્ ॥ ૩૭॥

ગુરવે સમ્યગર્ચ્ચાથ દેવતાં હૃદિસમ્ભજે ।
કરોમિમણ્ડલં વૃત્તં ચતુરશ્રં શિવપ્રિયે ॥ ૩૮॥

પુષ્પૈરભ્યર્ચ્ચ્યસાધારં શઙ્ખં સમ્પૂજયામહમ્ ।
અર્ચ્ચ્યયામિષડઙ્ગેન જલમાપૂરયામ્યહમ્ ॥ ૩૯॥

દદામિ ચાદિમં બિન્દું કુર્વે મૂલાભિમન્ત્રિતમ્ ।
તજ્જલેનજગન્માતસ્ત્રિકોણં વૃત્તસમ્યુતમ્ ॥ ૪૦॥

ષલ્કોણં ચતુરશ્રઞ્ચ મણ્ડલં પ્રણમામ્યહમ્ ।
વિધ્યયાપૂજયામીહ ત્રિખણ્ડેન તુ પૂજનમ્ ॥ ૪૧॥

બીજેનવૃત્તષલ્કોણં પૂજયામિ તવપ્રિયે ।
તસ્મિન્દેવીકલાત્માનાં મણિમણ્ડલમાશ્રયે ॥ ૪૨॥

ધૂમ્રાર્ચ્ચિષં નમસ્યામિ ઊષ્માં ચ જ્વલનીં તથા ।
જ્વાલિનીઞ્ચ નમસ્યામિ વન્દેહં વિસ્પુલિઙ્ગિનીમ્ ॥ ૪૩॥

સુશ્રિયં ચ સુરૂપાઞ્ચકમ્પિલાં પ્રણમામ્યહમ્ ।
નૌમિહવ્યવહાં નિત્યાં ભજે કવ્યવહાં કલામ્ ॥ ૪૪॥

સૂર્યાગ્નિમણ્ડલાં તત્ર સકલાદ્વાદશાત્મકમ્ ।
અર્ઘ્યપાદ્યમહન્તત્ર તપિનીં તાપિનીં ભજે ॥ ૪૫॥

ધૂમ્રાં મરીચીં વન્દેહં જ્વાલિનીં મરુહં ભજે ।
સુષુમ્નામ્ભોગદાં વન્દે ભજે વિશ્વાં ચ બોધિનીમ્ ॥ ૪૬॥

ધારિણીં ચ ક્ષમાં વન્દે સૌરીરેતાઃ કલાભજે ।
આશ્રયેમણ્મલં ચાન્દ્રં તલ્કલાષોડશાત્મકમ્ ॥ ૪૭॥

અમૃતાં માનદાં વન્દે પૂષાં તુષ્ટીં ભજામ્યહમ્ ।
પુષ્ટિમ્ભજે મહાદેવિ ભજેઽહં ચ રતિં ધૃતિમ્ ॥ ૪૮॥

રશનિં ચન્દ્રિકાં વન્દે કાન્તીં જોત્સના શ્રિયં ભજે ।
નેઔમિપ્રીતિઞ્ચાગતદાઞ્ચપૂર્ણિર્મામમૃતામ્ભજે ॥ ૪૯॥

ત્રિકોણલેખનં કુર્વ્વે આકારાદિસુરેખકમ્ ।
હલક્ષવર્ણસમ્યુક્તાંસ્પીતં તં હંસભાસ્કરમ્ ॥ ૫૦॥

વાક્કામશક્તિ સંયુક્તં હંસમારાધયામ્યહમ્ ।
વૃત્તાદ્બહિઃષડશ્રસ્યલેખનં પ્રકરોમ્યહમ્ ॥ ૫૧॥

પુરતોઽન્યાદિષલ્ખ઼ોણં કખગેનાર્ચ્ચયામ્યહમ્ ।
શ્રીવિદ્યયાસપ્તવારં કરોમ્યત્રાભિ મન્ત્રિતમ્ ॥ ૫૨॥

સમર્પ્પયામિ દેવેશિ તસ્માત્ ગન્ધાક્ષતાદિકમ્ ।
ધ્યાયામિપૂજાદ્રવ્યેષુ તત્ સર્વં વિદ્યયાયુતમ્ ॥ ૫૩॥

ચતુર્ન્નવતિસન્મન્ત્રાન્ સ્પૃષ્ટ્વા તત્ પ્રજપામ્યહમ્ ।
વહ્નેર્દ્દશકલાઃસૂર્યકલાદ્વાદશકં ભજે ॥ ૫૪॥

આશ્રયે શોડષકલાસ્તત્ર ચન્દ્રમસસ્તદા ।
સૃષ્ટિમ્વૃદ્ધિમ્ સ્મૃતિમ્ વન્દે મેધામ્ કાન્તીમ્ તથૈવ ચ ॥ ૫૫॥

લક્ષ્મીમ્ દ્યુથિમ્ સ્થિતામ્ વન્દે સ્થિતિમ્ સિદ્ધિમ્ ભજામ્યહમ્ ।
એતાબ્રહ્મકલાવન્દે જરાન્થામ્ પાલિનીમ્ ભજે ॥ ૫૬॥

શાન્તિં નમામીશ્વરીં ચ રતીં વન્દે ચ કારિકામ્ ।
વરદાંહ્લાદિનીં વન્દે પ્રીતિં દીર્ઘાં ભજાભમ્યહમ્ ॥ ૫૭॥

એતા વિષ્ણુઅકલાવન્દે તીક્ષણાં રૌદ્રિં ભયાં ભજે ।
નિદ્રાન્તન્દ્રીં ક્ષુધાં વન્દે નમામિ ક્રોધિનીં ક્રિયામ્ ॥ ૫૮॥

ઉલ્કારીં મૃત્યુરૂપાં ચ એતા રુદ્રકલા ભજે ।
નીલામ્પીતાં ભજે શ્વેતાં વન્દેહમરુણાં કલામ્ ॥ ૫૯॥

અનન્તખ્યાં કલાઞ્ચેતિ ઈશ્વરસ્ય કલાભજે ।
નિવૃત્તિઞ્ચપ્રતિષ્ઠાઞ્ચવિદ્યાંશાન્તિં ભજામ્યહમ્ ॥ ૬૦॥

રોધિકાં દીપિકાં વન્દે રેચિકાં મોચિકાં ભજે ।
પરાંસૂક્ષ્મામૃતાં સૂક્ષ્માં પ્રણામિ કુલેશ્વરિ! ॥ ૬૧॥

જ્ઞાનાખ્યાઞ્ચનમસ્યામિ નૌમિજ્ઞાનામૃતાં કલામ્ ।
આપ્યાયિનીંવ્યાપિનીં ચ મોદિનીં પ્રણમામ્યહમ્ ॥ ૬૨॥

કલાઃ સદાશિવસ્યૈતાઃ ષોડશ પ્રણમામ્યહમ્ ।
વિષ્ણુયોનિન્નમસ્યામિ મૂલવિદ્યાં નમામ્યહમ્ ॥ ૬૩॥

ત્રૈયમ્બકમ્ નમસ્યામિ તદ્વિષ્ણુમ્ પ્રણમામ્યહમ્ ।
વિષ્ણુયોનિમ્નમસ્યામિ મૂલવિદ્યામ્ નમામ્યહમ્ ॥ ૬૪॥

અમૃતં મન્ત્રિતં વન્દે ચતુર્ન્નવતિભિસ્તથા ।
અખણ્ડૈકરસાનન્દકરેપરસુધાત્મનિ ॥ ૬૫॥

સ્વચ્છન્દસ્પપુરણં મન્ત્રં નીધેહિ કુલરૂપિણિ ।
અકુલસ્થામૃતાકારેસિદ્ધિજ્ઞાનકરેપરે ॥ ૬૬॥

અમૃતં નિધેહ્યસ્મિન્ વસ્તુનિક્લિન્નરૂપિણિ ।
તદ્રૂપાણેકરસ્યત્વઙ્કૃત્વાહ્યેતત્સ્વરૂપિણિ ॥ ૬૭॥

ભૂત્વા પરામૃતાકારમયિ ચિત્ સ્પુરણં કુરુ ।
એભિર્મ્મનૂત્તમૈર્વન્દેમન્ત્રિતં પરમામૃતમ્ ॥ ૬૮॥

જોતિમ્મયમિદં વન્દે પરમર્ઘ્યઞ્ચ સુન્દરિ ।
તદ્બિન્દુભિર્મેશિરસિ ગુરું સન્તર્પ્પયામ્યહમ્ ॥ ૬૯॥

બ્રહ્માસ્મિન્ તદ્બિન્દું કુણ્ડલિન્યાં જુહોમ્યહમ્ ।
હૃચ્ચક્રસ્તાં-મહાદેવીમ્મહાત્રિપુરસુન્દરીમ્ ॥ ૭૦॥

નિરસ્તમોહતિમિરાં સાક્ષાત્ સંવિત્સ્વરૂપિણીમ્ ।
નાસાપુટાત્પરકલામથનિર્ગ્ગમયામ્યહમ્ ॥ ૭૧॥

નમામિયોનિમદ્ધ્યાસ્થાં ત્રિખણ્ડકુસુમાંઞ્જલિમ્ ।
જગન્માતર્મહાદેવિયન્ત્રેત્વાં સ્થાપયામ્યહમ્ ॥ ૭૨॥

સુધાચૈતન્યમૂર્ત્તીં તે કલ્પયામિમનું તવ ।
અનેનદેવિમન્ત્રયન્ત્રેત્વાં સ્થાપયામ્યહમ્ ॥ ૭૩॥

મહાપદ્મવનાન્તસ્થે કારણાનન્તવિગ્રહે ।
સર્વભૂતહિતેમાતરેહ્યપિ પરમેશ્વરિ ॥ ૭૪॥

દેવેશી ભક્તસુલભે સર્વાભરણભૂષિતે ।
યાવત્વમ્પૂજયામીહતાવત્ત્વં સુસ્થિરાભવ ॥ ૭૫॥

અનેન મન્ત્રયુગ્મેન ત્વામત્રાવાહયામ્યહમ્ ।
કલ્પયામિનમઃ પાદમર્ઘ્યં તે કલ્પયામ્યહમ્ ॥ ૭૬॥

ગન્ધતૈલાભ્યઞ્જનઞ્ચમજ્જશાલાપ્રવેશમ્ ।
કલ્પયામિનમસ્તસ્મૈ મણિપીઠોપ્રવેશનમ્ ॥ ૭૭॥

દિવ્યસ્નાનીયમીશાનિ ગૃહાણોદ્વર્ત્તનં શુભે ।

ગૃહાણોષ્ણાદકસ્નાનઙ્કલ્પયામ્યભિષેચનમ્ ॥ ૭૮॥

હેમકુમ્ભાયુતૈઃ સ્નિગ્ધૈઃ કલ્પયામ્યભિષેચનમ્ ।
કલ્પયામિનમસ્તુભ્યં ધએઔતેન પરિમાર્જ્જનમ્ ॥ ૭૯॥

બાલભાનુ પ્રતીકાશં દુકૂલં પરિધાનકમ્ ।
અરુણેનદુકુલેનોત્તરીયં કલ્પયામ્યહમ્ ॥ ૮૦॥

પ્રવેશનં કલ્પયામિ સર્વાઙ્ગાનિ વિલેપનમ્ ।
નમસ્તેકલ્પયામ્યત્ર મણિપીઠોપવેશનમ્ ॥ ૮૧॥

અષ્ટગન્ધૈઃ કલ્પયામિ તવલેખનમમ્બિકે ।
કાલાગરુમહાધૂપઙ્કલ્પયામિ નમશ્શિવે ॥ ૮૨॥

મલ્લિકામાલતીજાતિ ચમ્પકાદિ મનોરમૈઃ ।
અર્ચ્ચિતાઙ્કુસુમૈર્મ્માલાં કલ્પયામિ નમશ્શિવે ॥ ૮૩॥

પ્રવેશનં કલ્પયામિ નમો ભૂષણમણ્ડપે ।
ઉપવેશ્યંરત્નપીઠે તત્રતે કલ્પયામ્યહમ્ ॥ ૮૪॥

નવમાણિક્યમકુટં તત્રતે કલ્પયામ્યહમ્ ।
શરચ્ચન્દ્રનિભંયુક્તં તચ્ચન્દ્રશકલં તવ ॥ ૮૫॥

તત સીમન્તસિન્દૂરં કસ્તૂરીતિલકં તવ ।
કાલાઞ્જનઙ્કલ્પયામિ પાલીયુગલમુત્તમમ્ ॥ ૮૬॥

મણિકુણ્ડલયુગ્મઞ્ચ નાસાભરણમીશ્વરી! ।
તાટઙ્કયુગલન્દેવિ લલિતે ધારયામ્યહમ્ ॥ ૮૭॥

અથાદ્યાં ભૂષણં કણ્ઠે મહાચિન્તાકમુત્તમમ્ ।
પદકન્તે કલ્પયામિ મહાપદકમુત્તમમ્ ॥ ૮૮॥

મુક્તાવલીં કલ્પયામિ ચૈકાવલિ સમન્વિતામ્ ।
છન્નવીરઞ્ચકેયૂરયુગલાનાં ચતુષ્ટયમ્ ॥ ૮૯॥

વલયાવલિમાલાનીં ચોર્મિકાવલિમીશ્વરિ ।
કાઞ્ચીદામકટીસૂત્રંસૌભગ્યાભરણં ચ તે ॥ ૯૦॥

ત્રિપુરે પાદકટકં કલ્પયે રત્નનૂપુરમ્ ।
પાદાઙ્ગુલીયકન્તુભ્યં પાશમેકં કરેતવ ॥ ૯૧॥

અન્યે કરેઙ્કુશં દેવિ પૂણ્ડ્રેક્ષુધનુષં તવ ।
અપરેપુષ્પબાણઞ્ચ શ્રીમન્માણિક્યપાદુકે ॥ ૯૨॥

તદાવરણ દેવેશિ મહામઞ્ચાદિરોહણમ્ ।
કામેશ્વરાઙ્કુપર્યઙ્કુમુપવેશનમુત્તમમ્ ॥ ૯૩॥

સુધયા પૂર્ણર્ણચષકં તતસ્તત્ પાનમુત્તમમ્ ।
કર્પ્પૂરવીટિકાન્તુભ્યં કલ્પયામિ નમઃ શિવે ॥ ૯૪॥

આનન્દોલ્લાસવિલસદ્ધંસં તે કલ્પયામ્યહમ્ ।
મઙ્ગલારાત્રિકંવન્દે છત્રં તે કલ્પયામ્યહમ્ ॥ ૯૫॥

ચામરં યૂગલં દેવિદર્પ્પણં કલ્પયામ્યહમ્ ।
તાલવ્રિન્તઙ્કુલ્પયામિગન્ધપુષ્પાક્ષતૈરપિ ॥ ૯૬॥

ધૂપં દીપશ્ચનૈવેદ્યં કલ્પયામિ શિવપ્રિયે ।
અથાહમ્બૈન્દવે ચક્રે સર્વાનન્દમયાત્મકે ॥ ૯૭॥

રત્નસિંહાસને રમ્યે સમાસીનાં શિવપ્રિયામ્ ।
ઉદ્યદ્ભાનુસહસ્રાભાઞ્જપાપુષ્પસમપ્રભામ્ ॥ ૯૮॥

નવરત્નપ્રભાયુક્તમકુટેન વિરાજિતામ્ ।
ચન્દ્રરેખાસમોપેતાઙ્કુસ્તૂરિતિલકાઙ્કિતામ્ ॥ ૯૯॥

કામકોદણ્ડસૌન્દર્યનિર્જ્જિતભ્રૂલતાયુતામ્ ।
અઞ્જનાઞ્ચિતનેત્રાન્તુપદ્મપત્રનિભેષણામ્ ॥ ૧૦૦॥

મણિકુણ્ડલસમ્યુક્ત કર્ણર્ણદ્વયવિરાજિતામ્ ।
તામ્બૂલપૂરિતમુખીંસુસ્મિતાસ્યવિરાજિતામ્ ॥ ૧૦૧॥

આદ્યભૂષણસમ્યુક્તાં હેમચિન્તાકસંયુતામ્ ।
પદકેનસમોપેતાં મહાપદકસંયુતામ્ ॥ ૧૦૨॥

મુક્તાફલસમોપેતામેકાવલિસમન્વિતામ્ ।
કૌસુભાઙ્ગદસંયુક્તચતુર્બાહુસમન્વિતામ્ ॥ ૧૦૩॥

અષ્ટગન્ધસમોપેતાં શ્રીચન્દનવિરાજિતામ્ ।
હેમકુમ્ભોપમપ્રખ્યસ્તનદ્વન્દવિરાજિતામ્ ॥ ૧૦૪॥

રક્તવસ્ત્રપરીધાનાં રક્તકઞ્ચુકસંયુતામ્ ।
સૂક્ષ્મરોમાવલિયુક્તતનુમદ્ધ્યવિરાજિતામ્ ॥ ૧૦૫॥

મુક્તામાણિક્યખચિત કાઞ્ચીયુતનિતમ્બનીમ્ ।
સદાશિવાઙ્કસ્થબૃહન્મહાજઘનમણ્ડલામ્ ॥ ૧૦૬॥

કદલિસ્તમ્ભસંરાજદૂરુદ્વયવિરાજિતામ્ ।
કપાલીકાન્તિસઙ્કાશજઙ્ઘાયુગલશોભિતામ્ ॥ ૧૦૭॥

ગૂઢગુલ્ફદ્વયોપેતાં રક્તપાદસમન્વિતામ્ ।
બ્રહ્મવિષ્ણુમહેશાદિકિરીટસ્ફૂર્જિતાઙ્ઘ્રિકામ્ ॥ ૧૦૮॥

કાન્ત્યા વિરાજિતપદાં ભક્તત્રાણ પરાયણામ્ ।
ઇક્ષુકાર્મુકપુષ્પેષુપાશાઙ્કુશધરાંશુભામ્ ॥ ૧૦૯॥

સંવિત્સ્વરૂપિણીં વન્દે ધ્યાયામિ પરમેશ્વરીમ્ ।
પ્રદર્શયામ્યથશિવેદશામુદ્રાઃ ફલપ્રદાઃ ॥ ૧૧૦॥

ત્વાં તર્પ્પયામિ  ત્રિપુરે ત્રિધના પાર્વ્વતિ ।
અગ્નૌમહેશદિગ્ભાગે નૈરૃત્ર્યાં મારુતે તથા ॥ ૧૧૧॥

ઇન્દ્રાશાવારુણી ભાગે ષડઙ્ગાન્યર્ચ્ચયે ક્રમાત્ ।
આદ્યાઙ્કામેશ્વરીં વન્દે નમામિ ભગમાલિનીમ્ ॥ ૧૧૨॥

નિત્યક્લિન્નાં નમસ્યામિ ભેરુણ્ડાં પ્રણમામ્યહમ્ ।
વહ્નિવાસાન્નમસ્યામિ મહાવિદ્યેશ્વરીં ભજે ॥ ૧૧૩॥

શિવદૂતિં નમસ્યામિ ત્વરિતાં કુલ સુન્દરીમ્ ।
નિત્યાન્નીલપતાકાઞ્ચ વિજયાં સર્વમઙ્ગલામ્ ॥ ૧૧૪॥

જ્વાલામાલાઞ્ચ ચિત્રાઞ્ચ મહાનિત્યાં ચ સંસ્તુવે ।
પ્રકાશાનન્દનાથાખ્યામ્પરાશક્તિનમામ્યહમ્ ॥ ૧૧૫॥

શુક્લદેવીં નમસ્યામિ પ્રણમામિ કુલેશ્વરીમ્ ।
પરશિવાનન્દનાથાખ્યામ્પરાશક્તિ નમામ્યહમ્ ॥ ૧૧૬॥

કૌલેશ્વરાનન્દનાથં નૌમિ કામેશ્વરીં  સદા ।
ભોગાનન્દન્નમસ્યામિ સિદ્ધૌઘઞ્ચ વરાનને ॥ ૧૧૭॥

ક્લિન્નાનન્દં નમસ્યામિ સમયાનન્દમેવચ ।
સહજાનન્દનાથઞ્ચપ્રણમામિ મુહુર્મુહુ ॥ ૧૧૮॥

માનવૌઘં નમસ્યામિ ગગનાનન્દગપ્યહમ્ ।

વિશ્વાનન્દન્નમસ્યામિ વિમલાનન્દમેવચ ॥ ૧૧૯॥

મદનાનન્દનાથઞ્ચ ભુવનાનન્દરૂપિણીમ્ ।
લીલાનન્દન્નમસ્યામિ સ્વાત્માનન્દં મહેશ્વરિ ॥ ૧૨૦॥

પ્રણમામિપ્રિયાનન્દં સર્વકામફલપ્રદમ્ ।
પરમેષ્ટિગુરુંવન્દે પરમઙ્ગુરુમાશ્રયે ॥ ૧૨૧॥

શ્રીગુરું પ્રણમસ્યામિ મૂર્દ્ધ્નિ બ્રહ્મબિલેશ્વરીમ્ ।
શ્રીમદાનન્દનાથાખ્યશ્રિગુરોપાદુકાં તથા ॥ ૧૨૨॥

અથ પ્રાથમિકે દેવિ ચતુરશ્રે કુલેશ્વરિ ।
અણિમાંલખિમાં વન્દે મહિમાં પ્રણમામ્યહમ્ ॥ ૧૨૩॥

ઈશિત્વસિદ્ધિં કલયે વશિત્વં પ્રણમામ્યહમ્ ।
પ્રાકામ્યસિદ્ધિમ્ભુક્તિઞ્ચ ઇચ્છાપ્રાપ્તિમહં ભજે ॥ ૧૨૪॥

સર્વકામપ્રદાં સર્વકામસિદ્ધિમહં ભજે ।
મદ્ધ્યમેચતુરશ્રેહં બ્રાહ્મીં માહેશ્વરીં ભજે ॥ ૧૨૫॥

કૌમારીં વૈષ્ણવીં વન્દે વારાહીં પ્રણમામ્યહમ્ ।
માહેન્દ્રીમપિચામુણ્ડામ્મહાલક્ષ્મીમહં ભજે ॥ ૧૨૬॥

તૃતીયે ચતુરશ્રે તુ સર્વસંક્ષોભિણીં ભજે ।
સર્વવિદ્રાપિણીમ્મુદ્રાં સર્વાકર્ષિણિકાં ભજે ॥ ૧૨૭॥

મુદ્રાં વશઙ્કુરીં વન્દે સર્વોન્માદિનિકાં ભજે ।
ભજેમહાઙ્કુશાં મુદ્રાં ખેચરીં પ્રણમામ્યહમ્ ॥ ૧૨૮॥

બીજામુદ્રાં યોનિમુદ્રાં ભજે સર્વત્રિખણ્ડિનીમ્ ।
ત્રૈલોક્યમોહનઞ્ચક્રં નમામિ લલિતે તવ ॥ ૧૨૯॥

નમામિ યોગિનીં તત્ર પ્રખટાખ્યામભીષ્ટદામ્ ।
સુધાર્ણવાસનંવન્દે તત્ર તે પરમેશ્વરિ ॥ ૧૩૦॥

ચક્રેશ્વરિ મહં વન્દે ત્રિપુરાં પ્રણમામ્યહમ્ ।
સર્વસંક્ષોભિણીમ્મુદ્રાં તતોહં કલયે શિવે ॥ ૧૩૧॥

અથાહં ષોડશદલે કામાકર્ષિણિકાં ભજે ।
બુદ્ધ્યાકર્ષિણિકાં વન્દેઽહઙ્કારાકર્ષિણીં ભજે ॥ ૧૩૨॥

શબ્દાકર્ષિણિકાં વન્દે સ્પર્શાકર્ષિણિકાં ભજે ।
રૂપાકર્ષિણિકાંવન્દે રસાકર્ષિણિકાં ભજે ॥ ૧૩૩॥

ગન્ધાકર્ષિણિકાં વન્દે ચિત્તાકર્ષિણિકાં ભજે ।
ધૈર્યાકર્ષિણિકાંવન્દે સ્મૃત્યાકર્ષિણિકાં ભજે ॥ ૧૩૪॥

નામાકર્ષિણિકાં વન્દે બીજાકર્ષિણિકાં ભજે ।
આત્માકર્ષિણિકાંવન્દે અમૃતાકર્ષિણિકાં ભજે ॥ ૧૩૫॥

શરીરાકર્ષિણિકાં વન્દે નિત્યાં શ્રીપરમેશ્વરિ ।
સર્વાશાપૂરકંવન્દે કલ્પયેહં તવેશ્વરિ ॥ ૧૩૬॥

ગુપ્તાખ્યાં યોગિનીં વન્દે માતરં ગુપ્તપૂજ્યતામ્ ।
પોતામ્બુજાસનન્તત્ર નમામિ લલિતે તવ ॥ ૧૩૭॥

ત્રિપુરેશીં નમસ્યામિ ભજામિષ્ટાર્થસિદ્ધિદામ્ ।
સર્વવિદ્રાવિણિમુદ્રાન્તત્રાહં તે વિચન્તયે ॥ ૧૩૮॥

સિવે તવાષ્ટપત્રેહમનઙ્ગકુસુમાં ભજે ।
અનઙ્ગમેખલાંવન્દે અનઙ્ગમદનાં ભજે ॥ ૧૩૯॥

નમોહં પ્રણસ્યામિ અનઙ્ગમદનાતુરામ્ ।
અનઙ્ગરેખાઙ્કુલયે ભજેનઙ્ગાં ચ વેગિનીમ્ ॥ ૧૪૦॥

અનઙ્ગાકુશવન્દેઽહમનઙ્ગમાલિનીં ભજે ।
તત્રાહમ્પ્રણસ્યામિ દેવ્યા આસનમુત્તમમ્ ॥ ૧૪૧॥

નમામિ જગતીશાનીં તત્ર ત્રિપુરસુન્દરીમ્ ।
સર્વાકર્ષિણિકામ્મુદ્રાં તત્રાહ કલ્પયામિતે ॥ ૧૪૨॥

ભુવનાશ્રયે તવ શિવે સર્વસંક્ષોભિણીં ભજે ।
સર્વવિદ્રાવિણીંવન્દે સર્વકર્ષિણિકાં ભજે ॥ ૧૪૩॥

સર્વહ્લાદિનીં વન્દે સર્વસમ્મોહિનીં ભજે ।
સકલસ્તમ્ભિનીં વન્દે કલયે સર્વજૃમ્ભિણીમ્ ॥ ૧૪૪॥

વશઙ્કરીં નમસ્યામિ સર્વરઞ્જિનિકાં ભજે ।
સકલોન્મદિનીં વન્દે ભજે સર્વાર્થસાધકે ॥ ૧૪૫॥

સમ્પત્તિપુરિકાં વન્દે સર્વમન્ત્રમયીં ભજે ।
ભજામ્યેવતતશ્શક્તિં સર્વદ્વન્દ્વક્ષ્યઙ્કુરીમ્ ॥ ૧૪૬॥

તત્રાહં કલયે ચક્રં સર્વસૌભાગ્યદાયકમ્ ।
નમામિજગતાં ધાત્રીં સમ્પ્રદાયાખ્યયોગિનિમ્ ॥ ૧૪૭॥

નમામિ પરમેશાનીં મહાત્રિપુરવાસિનિમ્ ।
કલયેહન્તવ શિવે મુદ્રાં સર્વશઙ્કરીમ્ ॥ ૧૪૮॥

બહિર્દ્દશારે તે દેવિ સર્વસિદ્ધિપ્રદાં ભજે ।
સર્વસમ્પત્પ્રદાં વન્દે સર્વપ્રિયઙ્કરીં ભજે ॥ ૧૪૯॥

નમામ્યહં તતો દેવીં સર્વમઙ્ગલકારિણીમ્ ।
સર્વકામપ્રદાંવન્દે સર્વદુઃખવિમોચિનિમ્ ॥ ૧૫૦॥

સર્વમૃત્યુપ્રશમનીં સર્વવિઘ્નનિવારિણીમ્ ।
સર્વાઙ્ગસુન્દરીંવન્દે સર્વસૌભાગ્યદાયિનીમ્ ॥ ૧૫૧॥

સર્વાર્ત્થસાધકં ચક્રં તત્રાહં ને વિચિન્તયે ।
તત્રાહન્તે નમસ્યામિ કુલોત્તીર્ણાખ્ય યોગિનીમ્ ॥ ૧૫૨॥

સર્વમન્ત્રસનં વન્દે ત્રિપુરાશ્રિયમાશ્રયે ।
કલયામિતતો મુદ્રાં સર્વોન્માદન કારિણીમ્ ॥ ૧૫૩॥

અન્તર્દ્દશારે તે દેવિ સર્વજ્ઞાં પ્રણમામ્યહમ્ ।
સર્વશક્તિન્નમસ્યામિ સર્વૈશ્વર્યપ્રદાં ભજે ॥ ૧૫૪॥

સર્વજ્ઞાનમયીં વન્દે સર્વવ્યાધિવિનાશિનીમ્ ।
સર્વાધારસ્વરૂપાઞ્ચસર્વપાપહરામ્ભજે ॥ ૧૫૫॥

સર્વાનન્દમયિં વન્દે સર્વરક્ષાસ્વરૂપિણીમ્ ।
પ્રણમામિમહાદેવીં સર્વેપ્સિત ફલપ્રદામ્ ॥ ૧૫૬॥

સર્વરક્ષાકરં ચક્રં સુન્દરીં કલયે સદા ।
નિગર્ભયોનીંવન્દે તત્રાહં પ્રણમામ્યહમ્ ॥ ૧૫૭॥

સાદ્ધ્યસિદ્ધાસનં વન્દે ભજે ત્રિપુરમાલિનીમ્ ।
કલયામિતતો દેવીં મુદ્રાં સર્વમહાઙ્કુશામ્ ॥ ૧૫૮॥

અષ્ટારે વશિનીં વન્દે મહા કામેશ્વરીં ભજે ।
મોદિનીંવિમલાંવન્દે અરુણાજયિનીં ભજે ॥ ૧૫૯॥

સર્વેશ્વરીં નમસ્યામિ કૌલિનીં પ્રણમામ્યહમ્ ।

સર્વરોગહરઞ્ચક્રં તત્રાહં કલયે સદા ॥ ૧૬૦॥

નમામિ ત્રિપુરા સિદ્ધિં ભજે મુદ્રાં ચ ખેચરીમ્ ।
મહાત્રિકોણવત્બાહુચતુરશ્રે કુલેશ્વરિ ॥ ૧૬૧॥

નમામિ જૃમ્ભણાબાણં સર્વસમ્મોહિનીં ભજે ।
પાશઞ્ચાપં ભજે નિત્યં ભજે સ્તમ્ભનમઙ્કુશમ્ ॥ ૧૬૨॥

ત્રિકોણેહં જગદ્ધાત્રીં મહાકામેશ્વરીં ભજે ।
મહાવજ્રેશ્વરીંવન્દે મહાશ્રીભગમાલિનીમ્ ॥ ૧૬૩॥

મહાશ્રીસુન્દરીં વન્દે સર્વકામફલપ્રદામ્ ।
સર્વસિદ્ધિપ્રદઞ્ચક્રં તવદેવિ નમામ્યહમ્ ॥ ૧૬૪॥

નમામ્યતિરહસ્યાખ્યાં યોગિનીં તવકામદામ્ ।
ત્રિપુરામ્બાન્નમસ્યામિ બીજામુદ્રામહામ્ભજે ॥ ૧૬૫॥

મૂલમન્ત્રેણ લલિતે તલ્બિન્દૌ પૂજયામ્યહમ્ ।
સર્વાનન્દમયઞ્ચક્રં તવદેવિ ભજામ્યહમ્ ॥ ૧૬૬॥

પરાં પરરહસ્યાખ્યાં યોગિનીં તત્રકામદામ્ ।
મહાચક્રેશ્વરીંવન્દે યોનિમુદ્રામહં ભજે ॥ ૧૬૭॥

ધૂપદીપાદિકં સર્વમર્પ્પિતં કલ્પયામ્યહમ્ ।
ત્વત્પ્રીતયેમહામુદ્રાં દર્શયામિ તતશ્શિવે ॥ ૧૬૮॥

શાલ્યન્નં મધુસમ્યુક્તં પાયસાપૂપ સમ્યુક્તમ્ ।
ઘૃતસૂપસમાયુક્તન્દધિક્ષીરસમન્વિતમ્ ॥ ૧૬૯॥

સર્વભક્ષ્યસમાયુક્તં બહુશાકસમન્વિતમ્ ।
નિક્ષિપ્યકાઞ્ચને પાત્રે નૈવેદ્યં કલ્પયામિ તે ॥ ૧૭૦॥

સઙ્કલ્પબિન્દુના ચક્રં કુચૌ બિન્દુદ્વયેન ચ ।
યોનિશ્ચસપરાર્દ્ધેન કૃત્વા શ્રીલલિતે તવ ॥ ૧૭૧॥

એતત્ કામકલા રૂપં ભક્તાનાં સર્વકામદમ્ ।
સર્વસૌભાગ્યદંવન્દે તત્ર ત્રિપુરસુન્દરીમ્ ॥ ૧૭૨॥

વામભાગે મહેશાનિ વૃત્તં ચ ચતુરસ્રકમ્ ।
કૃત્વાગન્ધાક્ષતાદ્યૈશ્ચાપ્યર્ચ્ચયામિ મહેશ્વરીમ્ ॥ ૧૭૩॥

વાગ્દવાદ્યં નમસ્યામિ તત્ર વ્યાપકમણ્ડલમ્ ।
જલયુક્તેનપાણૌ ચ શુદ્ધમુદ્રા સમન્વિતમ્ ॥ ૧૭૪॥

તત્ર મન્ત્રેણ દાસ્યામિ દેવિ તે બલિમુત્તમમ્ ।
નમસ્તેદેવદેવેશિ નમ સ્ત્રૈલોક્યવન્દિતે ॥ ૧૭૫॥

નમશ્શિવવરાઙ્કસ્થે નમસ્ત્રીપુરસુન્દરિ ।
પ્રદક્ષિણનમસ્કારમનેનાહં કરોમિ તે ॥ ૧૭૬॥

તત સઙ્કલ્પમન્ત્રાણાં સમાજં પરમેશ્વરિ ।
પ્રજપામિમહાવિદ્યાં ત્વત્ પ્રીત્યર્થમહં શિવે ॥ ૧૭૭॥

તવ વિદ્યાં પ્રજપ્ત્વાથ નૌમિ ત્વાં પરમેશ્વરિ ।
મહાદેવિમહેશાનિ મહાશિવમયે પ્રિયે ॥ ૧૭૮॥

મહાનિત્યે મહાસિદ્ધે ત્વામહં શરણં શિવે ।
જયત્વન્ત્રિપુરે દેવિ લલિતે પરમેશ્વરિ ॥ ૧૭૯॥

સદાશિવ પ્રિયઙ્કરિ પાહિમાં કરુણાનિધે ।
જગન્માતર્જ્જગદ્રૂપેજગદીશ્વરવલ્લભે ॥ ૧૮૦॥

જગન્મયિ જગત્ સ્તુત્યે ગૌરિ ત્વામહમાશ્રયે ।
અનાદ્યેસર્વલોકાનામાદ્યે ભક્તેષ્ટદાયિનિ ॥ ૧૮૧॥

ગિરિરાજેન્દ્રતનયે નમસ્તીપુરસુન્દરિ ।
જયારીઞ્જયદેવેશિબ્રહ્મમાતર્મહેશ્વરિ ॥ ૧૮૨॥

વિષ્ણુમાતરમાદ્યન્તે હરમાતસ્સુરેશ્વરિ ।
બ્રહ્મ્યાદિમાતૃસંસ્તુત્યે સર્વાભરણ સમ્યુક્તે ॥ ૧૮૩॥

જ્યોતિર્મયિ મહારૂપે પાહિમાં ત્રિપુરે સદા ।
લક્ષ્મીવાણ્યાદિસં પૂજ્યે બ્રહ્મવિષ્ણુશિવપ્રિય ॥ ૧૮૪॥

ભજામિ તવ પાદાબ્જં દેવિ ત્રિપુરસુન્દરિ ।
ત્વત્પ્રીત્યર્થંયતઃ કાઞ્ચીચ્છક્તિં વૈપૂજયામ્યહમ્ ॥ ૧૮૫॥

તતશ્ચ કેતનાં શક્તિં તર્પયામિ મહેશ્વરિ ।
તથાપિત્વાં ભજંસ્તોષં ચિદગ્નૌ ચ દદામ્યહમ્ ॥ ૧૮૬॥

ત્વત્પ્રીત્યર્થ્યં મહાદેવિ મમાભીષ્ટાર્થ સિદ્ધયે ।
બદ્ધ્વાત્વાં ખેચરીમુદ્રાં ક્ષમસ્વોદ્વાસયામ્યહમ્ ॥ ૧૮૭॥

તિષ્ઠમે હૃદયેનિત્યં ત્રિપુરે પરમેશ્વરિ ।
જગદમ્બમહારાજ્ઞિ મહાશક્તિ શિવપ્રિયે ॥ ૧૮૮॥

હૃચ્ચક્રે તિષ્તમે નિત્યં મહાત્રિપુરસુન્દરિ ।
એતત્ત્રિપુરસુન્દર્યા હૃદયં સર્વકામદમ્ ॥ ૧૮૯॥

મહારહસ્યં સતતં દુર્લ્લભં દૈવતૈરપિ ।
સાક્ષાત્સદાશિવેનોક્તં ગુહ્યાત્ ગુહ્યમનુત્તમમ્ ॥ ૧૯૦॥

યઃ પતેત્ શ્રદ્ધયા નિત્યં શ ૃણુયાદ્વા સમાહિતઃ ।
નિત્યપૂજાફલન્દેવ્યાસ્સલભેન્નાત્ર સંશયઃ ॥ ૧૯૧॥

પાપૈઃ સમુચ્યતે સદ્યઃ કાયવાક્ક્ સિત્તસમ્ભવૈઃ ।
પૂર્વજન્મસમુત્ ભ્રદતૈર્જ્ઞાનાજ્ઞકૃતૈરપિ ॥ ૧૯૨॥

સર્વક્રતુષુયત્ પુણ્યં સર્વતીર્થેષુ યર્ફલમ્ ।
તત્પુણ્યં લભતે નિત્યં માનવો નાત્ર સંશયઃ ॥ ૧૯૩॥

અચલાં લભતે લક્ષ્મીં ત્રૈલોક્યેનાતિ દુર્લભામ્ ।
સાક્ષાદ્વિષ્ણુર્મહાલક્ષ્યાશીઘ્રમેવ ભવિષ્યતિ ॥ ૧૯૪॥

અષ્ટૈશ્વર્ય મવાપ્રોતિ સ શીઘ્રં માનવોત્તમઃ ।
ઘણ્ડિકાપાદુકાસિદ્ધ્યાદિષ્ટકંશીઘ્રમશ્નુતે ॥ ૧૯૫॥

શ્રીમત્ત્રિપુરામ્બિકાયૈ નમઃ ।
॥ શ્રીલલિતાહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

ૐ તત્ સત્ ॥

Encoded and proofread by Adwaith Menon adwaithmenon at gmail.com

---

*shrI lalitAhRidaya stotraM*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*